जपितव्यम्, जापयितव्यम्, जिजपिषितव्यम्, जञ्जपितव्यम्-जन्जपितव्यम्;
जपनीयम्, जापनीयम्, जिजपिषणीयम्, जञ्जपनीयम्-जन्जपनीयम्;
[1]जप्यम्,[A] जाप्यम्, जिजपिष्यम्, जञ्जप्यम्-जन्जप्यम्;
ईषज्जपः-दुर्जपः-सुजपः; — — —
जप्यमानः, जाप्यमानः, जिजपिष्यमाणः, जञ्जप्यमानः-जन्जप्यमानः;
[2]जपः,[B] उपजापः, जापः, जिजपिषुः, जञ्जपः-जन्जपः;
जपितुम्, जापयितुम्, जिजपिषितुम्, जञ्जपितुम्-जन्जपितुम्;
जप्तिः, जापना, जिजपिषा, जञ्जपा-जन्जपा;
जपनम्, जापनम्, जिजपिषणम्, जञ्जपनम्-जन्जपनम्;
जपित्वा, जापयित्वा, जिजपिषित्वा, जञ्जपित्वा-जन्जपित्वा;
सञ्जप्य, प्रजाप्य, प्रजिजपिष्य, प्रजञ्जप्य-प्रजन्जप्य;
जापम् २, } जापम् २, } जिजपिषम् २, } जञ्जपम् २-जन्जपम् २; }
जपित्वा २, } जापयित्वा, } जिजपिषित्वा २, } जञ्जपित्वा २-जन्जपित्वा २. }

## (585) "जभि नाशने" (X-चुरादिः- 1717. सक. सेट्. उभ.)

[अ] 'जृम्भणे जम्भते, यामे जम्भेत, नाशे तु जम्भयेत्॥'
(श्लो. 145) इति देवः।

जम्भकः-म्भिका, जिजम्भयिषकः-षिका, जम्भकः-म्भिका, जिजम्भिषकः-षिका, जाजम्भकः-म्भिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक-चम्पयतिवत् (199) ज्ञेयानि। इदित्करणात् णिचो वैकल्पिकत्वम्। जिजम्भिषुः[C] णिजभावपक्षे केवलाद्धातोः सन्नन्तादुकारः प्रत्ययः।

---

1. 'पोरदुपधात्' (3-1-98) इति यत्। ण्यदपवादः।
2. 'व्यधजपोरनुपसर्गे' (3-3-61) इति भावे, अप्प्रत्ययः। उपसृष्टात्तु घञेव। उपजापः।

A. 'मत्वा सहिष्णूनपरोपजप्यान् स्वकानधिष्ठाय जलान्तदुर्गान्।' भ. का. 12.32.
B. 'गोपायतां धर्ममधूपितात्मनां जल्पान् विमुच्याभवदुद्यमो जपे॥' धा. का. 1.51.
C. 'मल्लो जिजम्भिषुरसूदितवीर्यमीशं
मुष्ट्या जजास बहु पाशितवांश्च दोष्णा॥' धा. का. 3.38.

[अ] दैवश्लोकस्य प्रवृत्तिस्तु— 'जभ मैथुने' इति पाठमवलम्ब्य। 'रभिश्च भान्तेष्वथ मैथुने यभिः' (काशिका 7-2-10) इति वृत्तिग्रन्थपरामर्शे तु स पाठः न प्रामाणिक इति गम्यते।